महामहोपाध्यायश्रीभवनाथमिश्रविरचितः

# मीमांसानयविवेकः

(आदितः द्वितीयाध्यायान्तो भागः)

पण्डितराजेत्यादिविरुदाङ्कितेन, एम.ए.,
इति पदभाजा
एस्. सुब्रह्मण्यशास्त्रिणा सम्पादितः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)

महामहोपाध्यायश्रीभवनाथमिश्रविरचितः

# मीमांसानयविवेकः

(आदितः द्वितीयाध्यायान्तो भागः)

तर्कपादस्य विवेकतत्त्वव्याख्यया, ततश्च
महामहोपाध्यायश्रीवरदराजविरचितया
दीपिकाख्यव्याख्यया च संवलितः

श्रीमदाचार्यवेम्पटिकुटुम्बशास्त्रिविरचितया
प्ररोचनयालङ्कृतः

पण्डितराजेत्यादिविरुदाङ्कितेन, एम.ए. इति पदभाजा
एस्. सुब्रह्मण्यशास्त्रिणा सम्पादितः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
नवदेहली

# INTRODUCTION

## NAYAVIVEKA WITH DIPIKA COMMENTARY

Nayaviveka is a very ancient standard work in the Prabhakara School of Purvamimamsa. It has been handled and profusely quoted by ancient authors like Chitsukhacharya, Appaya Dikshita and others. It is a brief resume of the two commentaries of Brhati and Laghvi written by Prabhakara otherwise called Guru on the Bhashya of Sabaraswamin on the Sutras of Jaimini. It is an accepted fact that Prabhakara was a student of Kumarila who differed from his master in the interpretation of Mimamsa. He condemns Kumarila's vartikas without mentioning the name of the author. Salikanatha the commentator of Guru's works exposes the drawbacks of the vartikas, in his Rjuvimala and Dipasikha. But vartikas being the products of Kumarila who is believed to be an avatar of Kartikeya who came down to the world to save Hinduism from the onslaught of the Buddhists took root in the Bharat while Prabhakara's works fell into oblivion. This is the cause why Prabhakara's Brhati is available only upto Pada 2 of Ch. VI while his Laghvi has disappeared altogether. Brhati as far as available was edited by the present editor and published through the Madras University in the sixties.

Nayaviveka while putting forth the purports of Brhati and Laghvi of each Adhikarana condemns the views of Kumarila in each section. The first pada of Chapter I is called Tarka pada wherein ( 1 ) the necessity for the study of Mimamsa ( 2 ) the definition of Dharma ( 3 ) Pramanas acceptable to Mimamsakas ( 4 ) the nature of atmans ( 5 ) the eternality of letters ( varnas ) ( 6 ) the nature of verbal cognitions and ( 7 ) the eternal nature of the vedas are explained.

# विषयसूचिका

## प्रथमाध्यायस्य प्रथमस्तर्कपादः


| विषय | पृष्ट |
|---|---|
| जिज्ञासाधिकरणम् | १ |
| लोक इत्यादिभाष्यविवरणं | ७ |
| भट्टमतेन शास्त्रानारंभपूर्वपक्षः | १० |
| भट्टमतनिरासः | ११ |
| अध्यापनविधेरपूर्वत्वम् | १३ |
| अध्यापनविधौ प्रकारान्तरम् | १५ |
| आचार्यकरणविधेः श्रुतिसिद्धता | १७ |
| अध्ययनं आचार्यकरणविधिमूलम् | २३ |
| अत्र परोक्तदोषनिरासः | २४ |
| अध्यापनविधेः आचार्याधिकारपरत्वम् | ३२ |
| अध्ययनविधेरर्थपरत्वे विवरणटीकाभिप्रायः | ३३ |
| चोदनासूत्रविवरणम्, कार्यज्ञानस्यैव प्रवर्तकता | ४२ |
| सिद्धार्थे व्युत्पत्त्यभावः | ४४ |
| शब्दस्यार्थास्पर्शित्वशङ्कातन्निरासौ | ४९ |
| पौरुषेयवाक्यानां पुरुषाभिप्रायानुमापकता | ५० |
| अपूर्वमेव धर्मः | ५७ |
| चोदनासूत्रे अर्थपदप्रयोजनम् | ५८ |
| श्येनस्याधर्मता | ६० |
| तस्य निमित्तपरीष्टिः | ६४ |
| प्रत्यक्षसूत्रम् | ६७ |
| इन्द्रियाणां प्राप्यकारिता | ७१ |
| मनोनिरूपणम् | ७५ |
| प्रत्यक्षलक्षणम् | ७७ |
| औत्पत्तिकसूत्रम्। पदानां कार्यान्विते शक्तिः | ८१ |
| वृत्तिकारमतम्। तस्य भाष्यासम्मतत्वं च | ८५ |
| असत्ख्यातिः | ८६ |
| अन्यथाख्यातिनिरासः | ९२ |

सकृत्प्रयुक्तं पदं कालावस्थाभेदेन नानार्थं स्यात्। अथ नित्यमेवोभयार्थम्, तदा[1] कर्त्रभिप्रायतयैव सिद्धमात्मनेपदमिति व्यर्थं[2] लक्षणान्तरं स्यात्। शाब्दप्रक्रियाविरुद्धश्चायं प्रकारः। नन्वङ्गत्वे सत्युपनयनजन्यसंस्कारः प्रयोगापवर्गी स्यात्; पुरुषार्थसंस्कारान्तर्भावश्च संहितासु न दृश्येत। मैवम्; "द्विजातीनामध्ययनमिज्यादानम्" इत्यादिस्मृतेः पुन-

यमीति भावः। सूत्रव्याख्यातृसम्मत्यभावाच्च लक्षणद्वयसमावेशो नोपेय इत्याह—शाब्दप्रक्रियाविरुद्धश्चेति। ननु स्वपक्षेऽप्यङ्गजन्यः संस्कारः कर्माश्रितोऽप्यग्न्यादिसंस्कारवत् प्रयोगापवर्गी स्यादिति कर्त्रभिप्राय एवेत्यतद्विषयतोक्तिर्मानहीनेति चोदयति—नन्वङ्गत्वे सतीति। गर्भाधानादिपुरुषार्थसंस्कारमध्यपाठश्च श्रुतिषूपनयनस्याङ्गत्वेऽनुपपन्न इत्यङ्गत्वपक्षे दूषणान्तरमाह—पुरुषार्थसंस्कारेति। परिहरति—मैवम्; द्विजातीनामिति। स्यादेतदेवं प्रयोगापवर्गित्वे, तत्तु स्मृतिबलाद्यावज्जीवानुवृत्त्यवगमान्नास्तीत्यर्थः।

ननु कथं स्मृतेः श्रौताङ्गत्वानुषङ्ग्यर्थविरोधित्वम्, मूलप्रमाणाभावात्? उक्तं च—श्रौतप्रयोग एवाचार्याद्यर्थस्येतरकालानुवृत्तौ हेतुः, न लौकिक इति। उच्यते - अधिकारश्रुतिस्तावदध्यापनविधावपि नास्ति, अनियोगफलत्वादाचार्यत्वस्येत्युक्तम्। तेनार्थबललब्धस्तत्राप्यधिकार इति स्थितम्। स चार्थो दक्षिणादिलाभान्ताचार्यत्वम्; अर्थलाभश्च अर्थबोधाधिकारान्ताध्ययनविध्यधिकार्यध्येत्रधीनः; अर्थबोधश्च स्वाध्यायार्थविषयस्वकर्तव्यप्रमितिरूपोऽधिकारकर इति तदनुष्ठानान्तः; तेन तत्सर्वोपकारकत्वधीगर्भमेवोपनयनस्याध्यापनशेषत्वमवधार्यते; न श्रुतिमात्रात्, साधिकारनिरधिकारबुद्ध्यधीनत्वाच्छेषतायाः। न चैवमन्तरङ्गाध्ययनशेषत्वमेवास्तूपनयनस्येति वाच्यम्, श्रुत्यवगताध्यापनसम्बन्धद्वारतयैवाध्ययनसम्बन्धोपस्थितेः, अध्यापनाधिकारप्रयुक्ताध्ययनानुष्ठानधीपूर्वकत्वाच्चाध्ययनविध्यधिकारस्य; न हि द्रव्यार्जननियमविधाविव द्रव्यार्थप्रवृत्तस्य, अर्थज्ञानार्थप्रवृत्तस्याधिकारलाभोऽध्ययनविधौ, विधिज्ञाप्यार्थतात्पर्यावधारणात् प्राक् तदर्थप्रवृत्त्ययोगात्। विधिश्च तात्पर्यज्ञापकोऽन्यो नास्तीति अध्यापनाधिकारधीरेव पूर्वभाविनीति तदङ्गमेवोपनयनमुपेयम्। नन्वेवमध्ययनादिक्रियानिर्वृत्तिमात्रेणास्तु तदुपकारकत्वमुपनयनस्य, तदुत्थसंस्कारस्तु शेष्यपवर्गान्त एवाङ्गत्वे स्यात्। मैवम्; शेषिनिर्वृत्तिद्वारतयापि अध्ययनस्योपनयनसम्बन्धे ह्युपनेयगतसंस्कारस्यापि तद्द्वारकमेव तन्निर्वर्तकत्वमिति संस्कृतकर्तृकाध्ययनसाध्यमेवाध्ययनापूर्वं स्ववाक्येनावगतमिति संस्कारस्यापि तदपूर्वनिष्पादकत्वमनिवार्यम्; 'ममेदं कर्त-

१. तथा. क. २. अनर्थकं विधानान्तरं. क.

महामहोपाध्यायश्रीभवनाथमिश्रविरचितो

# मीमांसानयविवेकः

(तृतीयाध्यायः)

## [ द्वितीयो भागः ]

तर्कपादस्य विवेकतत्त्वव्याख्यया, तदुपरितनस्य
महामहोपाध्यायश्रीवरदराजविरचितया
दीपिकाख्यव्याख्यया च संवलितः

पण्डितराजेत्यादिविरुदाङ्कितेन, एम.-ए.-पदभाजा
एस्.-सुब्रह्मण्यशास्त्रिणा संशोध्य प्रकाशं नीतः

राष्ट्रियसंस्कृतसंस्थानम्
नव-दिल्ली
१९६१

# विषयानुक्रमणिका

## तृतीयाऽध्यायस्य प्रथमः पादः


| विषयः | पृष्ठ |
|---|---|
| अथातः शेष-लक्षणम् | २ |
| शेषः परार्थत्वादिति | १३ |
| तेषामर्थेन सम्बन्धः | ३७ |
| द्रव्यम् चोत्पत्तिसंयोगात् तदर्थमेव चोद्यते | ४७ |
| एकत्वयुक्तमेकस्य श्रुतिसंयोगात् | ७१ |
| संस्काराद्वा गुणानामव्यवस्था स्यात् | ८७ |
| आनर्थक्यात्तदङ्गेषु | ८९ |
| संदिग्धे तु व्यवायाद्वाक्यभेदः स्यात् | ११७ |
| गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात् | १२३ |
| मिथश्चानर्थसंबन्धः | १३३ |
| आनन्तर्यमचोदना | १३७ |
| शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसंबन्धात् | १३८ |


## द्वितीयः पादः


| | |
|---|---|
| अर्थाभिदानसंयोगात् | १४१ |
| वचनात्वयथार्थमैन्द्री स्यात् | १५५ |
| तथाह्वानमपीति चेत् | १६२ |
| तथोत्थानविसर्जने | १६६ |
| सूक्तवाके च कालविधिः परार्थत्वात् | १६८ |
| कृत्स्नोपदेशादुभयत्र सर्ववचनम् | १७४ |
| लिङ्गक्रमसमाम्नानात्काम्ययुक्तं समाम्नातम् | १७९ |

स्यापि शेषशास्त्रस्यानपेक्षत्वं समर्थितम् । शेषस्यापि यच्छास्त्रार्थत्वमुक्तं न तत्साध्यशास्त्रार्थत्वं, किंत्वन्विताभिधायिवाक्यार्थरूपशास्त्रार्थत्वम् । अत एव वाक्यार्थव्यवहारः ।

अधिकरणमेवं न तावत्क्रियाकारकादिव्यतिरिक्तं शेषशेषितयाऽन्विताभिधानं व्युत्पन्नम् । न च कार्यतयाऽयमन्वयः, तदन्वितस्यापि नियोज्यादेरशेषत्वात् । अतः शेषलक्षणमनारभ्यमिति पूर्वपक्षः ।

राद्धान्तस्तु, गुणप्रधानभावेन हि सर्वत्र शब्दान्वयः गुणत्व-

---

भावादित्याशङ्क्याह—शेषस्यापीति । ग्रन्थे शास्त्रार्थत्वोक्तिः वाक्यार्थत्वाभिप्राया न निरपेक्ष शास्त्रार्थत्वाभिप्राया । अत एव हि भिन्नानां वाक्यार्थानां शेषशेषि चिन्तेति वाक्यार्थ व्यवहारः ।

अधिकरणशरीरं प्रदर्शयितुमाह—अधिकरणशरीरमेवमिति । अत्रेयं चिन्ता—किं शेषलक्षणमनारम्भणीयमुतारम्भणीयमिति । तदर्थमिदं चिन्त्यते किमचोदनालक्षण शेषशेषितयान्वयः उत चोदनालक्षण इति । तदर्थमिदं चिन्त्यते—किं क्रियाकारकाद्यन्वयातिरिक्तशेषशेषितयान्वयो लोके न व्युत्पन्नः उत व्युत्पन्न इति। तत्र पूर्वपक्षमाह—न तावदिति । अस्यार्थः—आस्तां तावत् शेषत्वस्वरूपस्य दुर्लक्षता लोकव्युत्पत्तिवैधुर्येण वाक्यतात्पर्यविषयत्वं तावच्छेषत्वस्य वक्तुं न शक्यते । तथाहि—देवदत्त गामानय शुक्लां दण्डेनेति वाक्य श्रवणसमनन्तरं प्रयोज्यवृद्धस्य क्रियाकारकाद्यन्वितार्थे प्रवृत्तिदर्शनात् तद्विषया धीरनुमीयते । तस्याश्च वाक्यानन्तर्यात् वाक्यकारणकत्वेन वाक्यस्य तत्र तात्पर्यमवसीयते । अत्र क्रियाकारकमात्रव्युत्पत्तिर्नशेषशेषिभावो व्युत्पन्नः तस्य प्रवृत्त्यनुपयोगात् । कार्यसाधनताज्ञानात्प्रवृत्तिः न क्रियाशेषताज्ञानात् अतः शेषशेषित्वव्युत्पत्त्यभावेन वाक्यतात्पर्य विषयत्वाभावान्न चोदनालक्षणत्वम् । ननु पदानां द्वैतीयाभिधानेनान्विताभिधाने वृत्तिः । पश्चात् कार्यतः शेषशेषितयाऽन्वयोऽस्तु तत्राह—न चेति। तत्र हेतुः—तदन्वितस्यापीति । आदिशब्दात् विषयस्य गृहदाहादेः निमित्तस्य च ग्रहणम् । यत एव शेषत्वस्य न चोदनालक्षणता अतोऽचोदनार्थविचारात्मकं शेषशेषित्वमस्मिन् शास्त्रेऽनारम्भणीयमिति पूर्वः पक्षः ।

राद्धान्तस्त्विति । अवगतैकवाक्यत्वाबाधाय शेषत्वान्वयोऽप्यङ्गीकार्यः अन्यथा कार्याकार्यपदयोरेकवाक्यतानुपपत्तेः ननु शेषत्वाभावे किमित्येकवाक्यत्वं न भवतीत्यत्राह—गुण प्रधानेति । यस्माल्लोके वेदे च सर्वत्र शब्द-

# MĪMĀṂSĀNAYAVIVÉKA

OF

MAHĀMAHOPĀDHYĀYA BHAVANĀTHA

**Volume III**

*By*

MAHĀMAHOPĀDHYĀYA VARADARĀJA

*Foreword by*

**PROF. V. KUTUMBA SASTRY**

*Edited by*

**Panditaraja**

**S. SUBRAHMANYA SHASTRI,** M.A.


RASHTRIYA SANSKRIT SANSTHAN

(Deemed University)

NEW DELHI

# विषयसूची


| | | |
|---|---|---|
| | प्ररोचना | *v* |
| १. | चतुर्थस्याध्यायस्य प्रथमः पादः | १-१२१ |
| २. | चतुर्थस्याध्यायस्य द्वितीयः पादः | १२२-१५७ |
| ३. | चतुर्थस्याध्यायस्य तृतीयः पादः | १५८-२०९ |
| ४. | चतुर्थस्याध्यायस्य चतुर्थः पादः | २१०-२३४ |
| ५. | पञ्चमस्याध्यायस्य प्रथमः पादः | २३५-२९२ |
| ६. | पञ्चमस्याध्यायस्य द्वितीयः पादः | २९३-३१५ |
| ७. | पञ्चमस्याध्यायस्य तृतीयः पादः | ३१६-३४४ |
| ८. | पञ्चमस्याध्यायस्य चतुर्थः पादः | ३४५-३६६ |
| ९. | षष्ठस्याध्यायस्य प्रथमः पादः | ३६७-४७२ |
| १०. | षष्ठस्याध्यायस्य द्वितीयः पादः | ४७३-५२० |
| ११. | षष्ठस्याध्यायस्य तृतीयः पादः | ५२१-५७१ |
| १२. | षष्ठस्याध्यायस्य चतुर्थः पादः | ५७२-५९७ |
| १३. | षष्ठस्याध्यायस्य पञ्चमः पादः | ५९८-६३८ |
| १४. | षष्ठस्याध्यायस्य षष्ठः पादः | ६३९-६५४ |
| १५. | षष्ठस्याध्यायस्य सप्तमः पादः | ६५५-६७४ |
| १६. | षष्ठस्याध्यायस्य अष्टमः पादः | ६७५-६८७ |

**स चोपकारः प्रकृतित इत्यतिदेशरूपं समाप्यते। प्रकृत्युपदेश-व्यवस्थितौ च तदीयोपकारातिदेशः तद्व्यवस्थितिश्च उपदेशषट्कान्ते इति नेदानीञ्चिन्ता।**

**यत्तूच्यते—केवलनियोगादेवोपपादकशरीरप्रतिपादनमत्र। अतिदेशे। तूपकारतंरश्चीन्यमात्रमिति न सञ्चिन्त्यते। तदयुक्तम्। पशवे क्रत्वादेस्साधनावस्थागतत्वमात्रमत्र नियोगादिति तच्छेषत्वमत्राचिन्त्यं स्यात्। सूत्रे च क्रत्वर्थग्रहणेन क्रतूपकारक-**

---

वादस्य तु स्तुतिपरस्य प्रणाड्या क्रत्वनुष्ठान एव प्रवृत्तिविशेषकरतेति क्रतूपकार एवान्तर्भावः इत्यर्थः। अत्रभाष्ये प्रयोजकः कश्चित् पुरुषार्थ इति कश्चिद्ग्रहणं प्रयुक्तम्। तस्य किं प्रयोजनमित्यत्राह कश्चिद्ग्रहणमिति। अत्र कश्चित् पुरुषार्थः प्रयोजक इति व्यत्यासेन यद्भाष्ययोजनं तत् प्रकरण-विरोधान्न युक्तमित्याह—यत्त्विति। अत्र पुरुषार्थपदस्य पुरुषोपकारतया लक्षणया प्रयोजकस्य पुरुषार्थान्तर्भावो वाच्यः, तत्र कश्चित् प्रयोजकः यः पुरुषार्थः पुरुषार्थान्तर्भूत इति व्याख्याने प्रयोजकस्य पुरुषार्थान्तर्भावः समर्थितः स्यात्। यदि तुव्यत्यासेन कश्चित्पुरुषार्थो यः स प्रयोजक इति व्याख्यायेत तदा प्रयोजकपुरुषार्थस्यान्तर्भावः समर्थितो भवति। तच्चायुक्तम्। प्रकरणविरोधादिति भावः। विवरणे त्विति। तन्मते वस्तुबलात् प्रयुक्तिरेवाध्यायार्थः नोत्पत्त्यधिकारशेषता। एवं च पञ्चमाद्यभाष्यमपि ऋजु। प्रयोजकाप्रायोजकलक्षणं वृत्तमिति। कथं तर्हि क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति प्रतिज्ञासूत्रमित्यत्राह—क्रत्वधीनेति। क्रत्वधीनप्रवृत्तिता क्रत्वर्थता। क्रतुरपूर्वं तदधीनप्रवृत्तिता क्रत्वर्थता मतेत्यर्थः। तथा पुरुष इति फलपरं फलाधीनप्रवृत्तिता पुरुषार्थता मतेत्यर्थः। अयमर्थः—तृतीये श्रुत्यादिभिः शेषत्वं चिन्तितम्। इह तु नियोगैकगम्या प्रवृत्तिरूपा प्रयुक्तिः चिन्त्यते। तेन प्रमाणभेदात् प्रमेयभेदाच्चाध्यायभेद इति। ननु च पुरुषाधीन प्रवृत्तेः फलाधीनत्वान्न तत्रोपादानव्यापार इति नेह तच्चिन्तायुक्तिरिति चोदयति—नन्विति। नैवमिति। अयवादतया पुरुषाधीनप्रवृत्तिचिन्तापि

महामहोपाध्यायश्रीभवनाथमिश्रविरचितः

# मीमांसानयविवेकः

( सप्तमाध्यायतः दशमाध्यायप्रथमपादान्तश्चतुर्थो भागः )

पण्डितराजेत्यादिविरुदाङ्कितेन, एम.ए.
इति पदभाजा
एस. सुब्रह्मण्यशास्त्रिणा सम्पादितः

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )

# MĪMĀṂSĀNAYAVIVÉKA

OF

MAHĀMAHOPĀDHYĀYA BHAVANĀTHA

**Volume IV**

*By*

MAHĀMAHOPĀDHYĀYA VARADARĀJA

*Foreword by*

**PROF. V. KUTUMBA SASTRY**

*Edited by*

**Panditaraja**

**S. SUBRAHMANYA SHASTRI,** M.A.


RASHTRIYA SANSKRIT SANSTHAN

(Deemed University)

NEW DELHI

# विषयसूची


| | | |
|---|---|---|
| | प्ररोचना | v |
| १. | सप्तमाध्यायस्य प्रथमः पादः | १ |
| २. | सप्तमाध्यायस्य द्वितीयः पादः | ५८ |
| ३. | सप्तमाध्यायस्य तृतीयः पादः | ६५ |
| ४. | सप्तमाध्यायस्य चतुर्थः पादः | १०६ |
| ५. | अष्टमस्याध्यायस्य प्रथमः पादः | ११५ |
| ६. | अष्टमस्याध्यायस्य द्वितीयः पादः | १६१ |
| ७. | अष्टमस्याध्यायस्य तृतीयः पादः | १७३ |
| ८. | अष्टमस्याध्यायस्य चतुर्थः पादः | १८९ |
| ९. | नवमाध्यायस्य प्रथमः पादः | १९४ |
| १०. | नवमाध्यायस्य द्वितीयः पादः | २३६ |
| ११. | नवमाध्यायस्य तृतीयः पादः | २६८ |
| १२. | नवमाध्यायस्य चतुर्थः पादः | २८१ |
| १३. | दशमाध्यायस्य प्रथमः पादः | २९२ |
| १४. | दशमाध्यायस्य द्वितीयः पादः | ३१६ |
| १५. | दशमाध्यायस्य तृतीयः पादः | ३४६ |
| १६. | दशमाध्यायस्य चतुर्थः पादः | ३६२ |
| १७. | दशमाध्यायस्य पञ्चमः पादः | ३८६ |
| १८. | दशमाध्यायस्य षष्ठः पादः | ३९४ |
| १९. | दशमाध्यायस्य सप्तमः पादः | ४११ |

स्वरूपपरा चतुर्थे चिन्ता कृता। स्तुतशस्त्रसिद्धान्ते तु असत्यपि न यथा प्रतिज्ञात बाधानुपपत्तिरिति न बाधे कार्या तच्चिन्ता।

स्वस्थानस्थाया एव बाधोपयोगिता सौकर्यादुक्ता। यत्तूच्यते नाद्यं प्रामाण्यादिरूपमिति न पूर्वत्रसङ्गतम्। उपदेशरूपतया तु प्रसङ्गात्। तस्मात् कार्योपयोगितयात्वभ्यर्हितमित्युत्तरत्रकृतमिति। तदयुक्तम्। उक्तं हि विनियोगे साक्षात्सङ्गतत्वं अभ्यर्हितात्तु आरब्ध समाप्तावेव युक्ता। न चेदं युक्तं, अवान्तरवाक्यार्थरूप कार्य विवक्षया पूर्वपक्षः अविवक्षया च राद्धान्त इति कार्यत एव चिन्तेयमिति। यतो विवक्षापक्षे स्वातन्त्र्यान्ना-वान्तरकार्यता। अविवक्षायांतु परमकार्यात् ग्राहकादेवावगतिरिति न

---

समिदादीति। तत्र हेतुः अयुक्तत्वादिति ननु समिदाद्य पूर्वस्य कार्यत्वमन्यार्थतागर्भमेवेति कार्यस्यापि नान्यार्थत्व दोष इति न वाच्यमित्याह न चेति। यत इति। नह्यन्यार्थता पूर्विका कार्यता किन्तु प्रथमत एवेत्यर्थः। तत्र हेतुः प्रथमेति। ननु दर्शपूर्णमासवाक्यस्य उद्देशकत्वमयुक्तं साधिकारविध्यन्तरपरत्वादिति चोदयति नन्विति परिहरतितत्रेद-मिति। तद्वाक्यस्य विध्यन्तरपरत्वे तदन्वयः समिदादिविधेरनुपपन्नः उद्धिश्य विधि व्यतिरेकेण सन्निधिमात्रेणान्वयायोगात् वाक्यार्थयोरन्वयाव्युत्पत्तेः। अत्र प्रतीतान्वय-सिद्धार्थमुद्दिश्य विधिरेवेति तात्पर्यमवधृतमित्यर्थः। नन्वेवमपि किमिति दर्शपूर्णमास-वाक्यमुद्देशकत्वं समिदादिवाक्यमेव किमिति न भवतीत्यत्राह योग्यतयेति साधिकार-वाक्यमेव अधिकारवद्यज्युद्देशक्षमं न निरधिकारवाक्यमिति समिदादि वाक्यं विधायकं दर्शपूर्णमासवाक्यमुद्देशकम्। किञ्चानेकेषां वि धायकत्वहानाद्वरमेकस्याधिकार-वाक्यस्यतद्धानमेवेत्यर्थः। नन्वेवं नाम कामिपदयोः कथमन्वयइत्यत्राह तत्रेति। ननु साधिकार वाक्यस्य स्वतन्त्रकार्यपरस्योद्देशकत्वकल्पनं कामिनामपदयोरनाञ्जसत्वं च न युक्तं, तद्वरं समिदादौ विश्वजिद्वदधिकारान्तरकल्पनाधिकारपदस्यानुषङ्गकल्पना स्वतन्त्रकार्यप्रतीतेरस्त्वित्यत्राह अवगतेति। अस्यार्थः स्वतस्तावत् सन्निधानमात्रा-न्निरधिकारयागानां साधिकारयागान्वयो भाति। अन्यथा तत्सन्निधिपाठानर्थक्यात्। स्वान्वयो न सन्निधिमात्रान् भार्या राज्ञः पुरुषो देवदत्तस्येत्यादावदर्शनात्। न च कार्यपरत्वार्थमन्वयः स्वपदस्थकार्यान्वयनिराकाङ्क्षत्वात्। न चानुष्ठानसिद्ध्यर्थं